श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ अग्रमणिमालास्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ अग्रमणिमालास्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः ॥ **1.1** ॥

वन्दे विष्णुपदासक्तं तमृषिं ताञ्च पादुकाम्।
यथार्था शठजित्संज्ञा मच्चित्तविजयाद्ययोः ॥ **2.1** ॥

वन्दे तद् रङ्गनाथस्य मान्यं पादुकयोर्युगम्।
उन्नतानामवनतिः नतानां यत्र चोन्नतिः ॥ **3.1** ॥

भजामः पादुके ! याभ्यां भरतस्याग्रजस्तदा।
प्रायः प्रतिप्रयाणाय प्रास्थानिकमकल्पयत् ॥ **4.1** ॥

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे।
आनृशंस्यं ययोरासीत् आश्रितेष्वनवग्रहम् ॥ **5.1** ॥

अधीष्टे पादुका सा मे यस्याः साकेतवासिभिः।
अन्वयव्यतिरेकाभ्याम् अन्वमीयत वैभवम् ॥ **6.1** ॥

पाहि नः पादुके ! यस्याः विधास्यन् अभिषेचनम्।
आभिषेचनिकं भाण्डं चक्रे रामः प्रदक्षिणम् ॥ **7.1** ॥

अभिषेकोत्सवात्तस्मात् यस्या निर्यातनोत्सवः।
अत्यरिच्यत तां वन्दे भव्यां भरतदेवताम्॥ **8.1** ॥

नमस्ते पादुके ! पुंसां संसारार्णवसेतवे।
यदारोहस्य वेदान्ता वन्दिवैतालिकाः स्वयम्॥ **9.1** ॥

शौरेः शृङ्गारचेष्टानां प्रसूतिं पादुकां भजे।
यामेष भुङ्क्ते शुद्धान्तात् पूर्वं पश्चादपि प्रभुः॥ **10.1** ॥

अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान्।
इति सीताऽपि यद्वृत्तिम् इयेष प्रणमामि ताम्॥ **11.1** ॥

शौरेः सञ्चारकालेषु पुष्पवृष्टिर्दिवश्च्युता।
पर्यवस्यति यत्रैव प्रपद्ये तां पदावनीम्॥ **12.1** ॥

पान्तु वः पद्मनाभस्य पादुकाकेळिपांसवः।
अहल्यादेहनिर्माणपर्यायपरमाणवः॥ **13.1** ॥

श्रुतीनां भूषणानां ते शङ्के रङ्गेन्द्रपादुके !।
मिथः सङ्घर्षसञ्जातं रजः किमपि शिञ्जितम्॥ **14.1** ॥

उदर्चिषस्ते रङ्गेन्द्र पादावनि ! बहिर्मणीन्।
अन्तर्मणिरवं श्रुत्वा मन्ये रोमाञ्चिताकृतीन्॥ **15.1** ॥

मुखबाहूरुपादेभ्यो वर्णान् सृष्टवतः प्रभोः।
प्रपद्ये पादुकां रत्नैः व्यक्तवर्णव्यवस्थितिम्॥ **16.1** ॥

प्रपद्ये रङ्गनाथस्य पादुकां पद्मरागिणीम्।
पदैकनियतां तस्य पद्मवासामिवापराम्॥ **17.1** ॥

बद्धानां यत्र नित्यानां मुक्तानामीश्वरस्य च।
प्रत्यक्षं शेषशेषित्वं सा मे सिद्ध्यतु पादुका॥ **18.1** ॥

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम्।
यया नित्यं तुळस्येव हरितत्त्वं प्रकाश्यते॥ **19.1** ॥

हरिणा हरिनीलैश्च प्रतियत्नवतीं सदा।
अयत्नलभ्यनिर्वाणाम् आश्रये मणिपादुकाम्॥ **20.1** ॥

शौरेः शुद्धान्तनारीणां विहारमणिदर्पणम्।
प्रसत्तेरिव संस्थानं पदत्राणमुपास्महे॥ **21.1** ॥

कल्याणप्रकृतिं वन्दे भजन्तीं काञ्चनश्रियम्।
पदार्हां पादुकां शौरेः पद एव निवेशिताम्॥ **22.1** ॥

सृष्टां भूमावनन्तेन नित्यं शेषसमाधिना।
अहं सम्भावयामि त्वाम् आत्मानमिव पादुके !॥ **23.1** ॥

प्रपद्ये पादुकारूपं प्रणवस्य कलाद्वयम्।
ओतं मितमिदं यस्मिन् अनन्तस्यापि तत्पदम्॥ **24.1** ॥

अणोरणीयसीं विष्णोः महतोऽपि महीयसीम्।
प्रपद्ये पादुकां नित्यं तत्पदेनैव सम्मिताम्॥ **25.1** ॥

उदग्रयन्त्रिकां वन्दे पादुकां यन्निवेशनात्।
उपर्यपि पदं विष्णोः प्रत्यादिष्टप्रसाधनम्॥ **26.1** ॥

सूचयन्तीं स्वरेखाभिः अनालेख्यसरस्वतीम्।
अलेखनीयसौन्दर्याम् आश्रये शौरिपादुकाम्॥ **27.1** ॥

कलासु काष्ठामातिष्ठन् भूम्ने सम्बन्धिनामपि।
पादुका रङ्गधुर्यस्य भरताराध्यतां गता॥ **28.1** ॥

विधौ प्रवृत्ते यद्द्रव्यं गुणसंस्कारनामभिः।
श्रेयः साधनमाम्नातं तत्पदत्रं तथाऽस्तु मे॥ **29.1** ॥

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम्।
विचित्रजगदाधारो विष्णुर्यत्र प्रतिष्ठितः॥ **30.1** ॥

प्रपद्ये पादुकां देवीं परविद्यामिव स्वयम्।
यामर्पयति दीनानां दयमानो जगद्गुरुः॥ **31.1** ॥

उपाख्यातां तथात्वेन वसिष्ठाद्यैर्महर्षिभिः।
उपायफलयोः काष्ठाम् उपासे रामपादुकाम्॥ **32.1** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे अग्रमणिमालास्तोत्रं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥